10(49)

No. of Pages : 12

# संकलित परीक्षा-1 ( 2016-17 )

# संस्कृतम् - सम्प्रेषणात्मकम्

E

## कक्षा - दशमी

समय : होरात्रयम् पूर्णाङ्क : 90

**निर्देशाः**

(i) प्रश्नपत्रे **चत्वारः खण्डाः** सन्ति।

खण्डः (क) अपठित-अवबोधनम् - **10 अङ्काः**

खण्डः (ख) रचनात्मक-कार्यम् - **15 अङ्काः**

खण्डः (ग) अनुप्रयुक्त-व्याकरणम् - **30 अङ्काः**

खण्डः (घ) पठित-अवबोधनम् - **35 अङ्काः**

(ii) सर्वे प्रश्नाः **अनिवार्याः**।

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्नसंख्या अवश्यमेव लेखनीया।

(v) उत्तराणि संस्कृतेनैव लेखनीयानि।

## खण्ड - 'क'

## अपठित-अवबोधनम् ( 10 अङ्काः )

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत। ( 2+2+4+2 )** 10

पश्य, पश्य। तत्र एकम् उद्यानम् अस्ति। उद्यानं न केवलं सुन्दरम् अपितु विशालम् अपि अस्ति। जनाः न केवलं मनोरञ्जनाय अपितु विश्रामाय, चित्तस्य आह्लादाय, शुद्धपवनाय च उद्यानेषु भ्रमन्ति। तत्र उन्नताः वृक्षाः मनोहराणि पुष्पाणि खगानां च मधुरध्वनिः सर्वेभ्यः जीवेभ्यः सदैव सुखम् एव यच्छति। धन्यानि एतादृशानि उद्यानानि। उद्यानानि सर्वथा रक्षणीयानि। एतानि सततं पर्यावरणं शुद्धं कुर्वन्ति।

**प्रश्नाः**

**I. एकपदेन उत्तरत।**

(i) उद्याने कीदृशाः वृक्षाः सन्ति?

(ii) उद्याने केषां मधुरध्वनिः सुखं यच्छति?

**II. पूर्णवाक्येन उत्तरत।**

(i) उद्यानं कीदृशम् अस्ति?

(ii) जनाः उद्यानेषु किमर्थम् भ्रमन्ति?

**III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं निर्देशानुसारम् चित्वा लिखत।**

(i) 'मनोहराणि पुष्पाणि' अत्रः किं विशेषणपदम् अस्ति?

(अ) मनोहरम् (ब) मनोहराणि

(स) पुष्पाणि (द) पुष्पम्

(ii) 'तत्र एकम् उद्यानम् अस्ति।' अत्र अस्ति क्रियापदस्य कर्तृपदं किम्?

(अ) एकम् (ब) तत्र

(स) उद्यानम् (द) तत्रएकम्

(iii) 'कटु' इति पदस्य अनुच्छेदे विपर्ययः कः?

(अ) 'मधुर' इति (ब) 'तिक्त'

(स) 'कठोर' इति (द) 'सुखद' इति

(iv) अस्मिन् वाक्ये 'एतानि' सर्वनामपदं केभ्यः प्रयुक्तम्?

(अ) पुष्पेभ्यः (ब) उद्यानेभ्यः

(स) खगेभ्यः (द) वृक्षेभ्यः

**IV. अस्य अनुच्छेदस्य कृते एकम् उपयुक्तं शीर्षकं लिखत।**

## खण्ड - 'ख'
## रचनात्मक-कार्यम् - ( 15 अङ्काः )

2. **भवती सौम्या। भवत्याः मित्रस्य मातुः स्वस्थवृत्तिं प्रष्टुं, लिखितं पत्रं मञ्जूषास्थपदैः पूरयतु।(½×10)=5**

उडुपीनगरम्

कर्णाटकतः

तिथिः................

(i)______रमे।

सस्नेहं नमः।


अत्र कुशलम्। तत्रापि इति प्रार्थये। गत-सप्ताहे यदा अहं (ii)______ गृहम् आगतवती तदा भवत्याः मातुः स्वास्थ्यं न (iii)______ आसीत्। इदानीं कथमस्ति इति (iv)______ ज्ञापयतु। अधुना वर्षाकाले (v)______ संजायन्ते। अतः जलस्य विषये अधिकां (vi)______ स्वीकरोतु। सर्वदा (vii)______ उष्णीकृत्य (viii)______ । तत्र परिवारे सर्वेषां कृते मम (ix)______।

भवत्याः प्रियसखी (x)______

**मञ्जूषा**

| **प्रणामाः, सौम्या, जलम्, समीचीनम्, सावधानीम्, पिबतु, त्वरितं, सखि, भवत्याः, विविधज्वराः।** |
|---|

3. चित्रं वीक्ष्य मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च संस्कृतवाक्यानि रचयत। **2×5=1**



**मञ्जूषा**

| |
|---|
| चलभाषित्रयन्त्रम् ( मोबाइलफोन ), मोटरसाइकिलयानेन, दुरुपयोग:, घातक:, दुर्घटना, मार्गे, यात्रायां, सम्भाविता, नियमस्य, सहसा, उल्लंघनम्, दण्डनीय: |

**अथवा**

'मार्ग-सुरक्षा' विषयम् अधिकृत्य मञ्जूषापदानां सहायतया पञ्च वाक्यानि संस्कृतेन रचयत।

**मञ्जूषा**

| |
|---|
| यातायातसंकेतान्, रक्त, पीत, हरित, विद्युत्संकेतान्, अवधानेन, वाहनचालनसमये, पदयात्री, जीवनघातका:, परिणामा:, इतस्तत:, दृष्ट्वा, वामत:, दक्षिणत:, पालनीय:। |

## खण्ड - 'ग'

## अनुप्रयुक्त (-) व्याकरणम् (30 अङ्का:)

4. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं विच्छेदं वा कुरुत। **1×5=5**

(i) <u>तदैव</u> सा विहस्य अवदत्।

(ii) बालका: <u>नत+उन्नते</u> मार्गे क्रीडन्ति।

(iii) मनस: निग्रहं <u>वायोरिव</u> सुदुष्करम् वर्तते।

(iv) अहं+कारः कदापि न कर्तव्यः।

(v) बालाः पुस्तिकायाम् एकम् <u>अनुच्छेदम्</u> लिखन्तु।

**5. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत।** **1×6=6**

(i) ह्यः सः <u>अस्वस्थः</u> आसीत्।

(अ) न स्वस्थम् (ब) न स्वस्थः

(स) न स्वे स्थितः (द) अन् स्वस्थः

(ii) पाणिनिः <u>अष्टाध्यायीम्</u> अरचयत्।

(अ) अष्टौ अध्यायाः (ब) अष्टानाम् अध्यानां रचना

(स) अष्टानाम् अध्यायानां समाहारः ताम् (द) अष्ट अध्यायाः यत्र वर्तन्ते

(iii) अस्मिन् सरोवरे <u>पङ्के जायन्ते इति</u> सन्ति।

(अ) पङ्कजम् (ब) पङ्कजानि

(स) पङ्कजाम् (द) पङ्कजान्

(iv) स्वामी दयानन्दः <u>महर्षिः</u> आसीत्।

(अ) महत् ऋषिः (ब) महा ऋषि

(स) महान् ऋषिः (द) महऋषि

(v) अर्जुनः एकः <u>वीरः पुरुषः</u> आसीत्।

(अ) वीरम् पुरुषम् (ब) वीराः पुरुषाः

(स) वीरपुरुषः (द) वीरस्यपुरुषः

(vi) अहम् 'पञ्चानाम् गङ्गानाम् समाहारः' यत्र तत्र गच्छामि।

(अ) पञ्चगङ्गम्  (ब) पञ्चगङ्गाः

(स) पञ्चगङ्गाम्  (द) पञ्चगङ्गानाम्

**6. अधोलिखितवाक्येषु रेखाङ्कितपदेषु प्रकृतिप्रत्ययौ संयोज्य विभज्य वा लिखत।** **1×5=5**

(i) छात्रैः पाठः पठ्+तव्यत्।

(ii) पर्यावरण-रक्षार्थं सर्वैः एव वृक्षाः रोपणीयाः।

(iii) धैर्य+मतुप् जनाः विपदां दूरीकर्तुं समर्थाः भवन्ति।

(iv) दानी एव परोपकारस्य महत्त्वं जानाति

(v) बौद्धिकः विकासः उन्नत्यै अनिवार्यः।

**7. मञ्जूषायाः उचितम् अव्ययपदं चित्वा वाक्येषु रिक्तस्थानानि पूरयत।** **1×5=**

(i) शोभनाः बालाः कदापि ________ न वदन्ति।

(ii) ________ माता तथा पुत्री।

(iii) विद्यालयस्य परिसरे छात्रैः ________ चलितव्यम्।

(iv) अहम् ________ श्रमदाने तव साहाय्यं करिष्यामि।

(v) ________ जनेषु अत्यधिकं भ्रातृभावः आसीत्।

**मञ्जूषा**

| |
|---|
| **अपि, शनैः, उच्चैः, पुरा, यथा** |

**8. अधोलिखिते संवादे वाच्यानुसारं रिक्तस्थानपूर्तिं कुरुत।** **1×5**

चिकित्सिका – परिचारिके! किम् त्वं रोगिणे औषधिं (i)

परिचारिका - आम्, मया रोगिणे __(ii)__ दीयते।

चिकित्सिका - __(iii)__ गृहं न गच्छसि।

परिचारिका - किञ्चित् कालान्तरं मया गृहं __(iv)__।

चिकित्सिका - पुनः __(v)__ गृहात् कदा आगम्यते?

परिचारिका - अहं सायं पञ्चवादने आगच्छामि।

9. **अधोलिखितवाक्येषु अङ्कानां स्थाने समयसूचकसंस्कृतसंख्यापदं लिखत।** 1×4=4

(i) प्रातः हिन्दीभवने ________ 10.00 वादने दीप-प्रज्ज्वालनम्।

(ii) प्रातः ________ 10.30 वादने भाषणानि।

(iii) प्रातः ________ 11.15 वादने संस्कृतश्लोकोच्चारण प्रतियोगिता।

(iv) मध्याह्ने ________ 1.45 वादने पुरस्कार-वितरण-समारोहः।

## खण्ड - 'ग'

## पठित - अवबोधनम् - (35 अङ्काः)

10. **अधोलिखितं गद्यांशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि निर्देशानुसारं लिखत।** (2+1+2)=5

कस्मिंश्चिन्नगरे चन्द्रो नाम भूपतिः प्रतिवसति स्म। तस्य पुत्राः वानरक्रीडारताः वानरयूथं नित्यमेव विविधैः भोज्यपदार्थैः पुष्टिं नयन्ति स्म। तस्मिन् राजगृहे बालवाहनयोग्यं मेषयूथम् आसीत्। तेषां मेषाणां मध्ये एको मेषः जिह्वालोलुपतया अहर्निशं महानसं प्रविश्य यत् पश्यति तद् भक्षयति। ते च सूपकाराः यत्किञ्चित् काष्ठं, मृण्मयं भाजनं, कांस्यताम्रपात्रं वा पश्यन्ति तेन तम् आशु ताडयन्ति स्म।

**I. एकपदेन उत्तरत।**

(i) भूपतेः नाम किम्?

(ii) कुत्र मेषयूथम् अपि आसीत्?

**II. पूर्णवाक्येन उत्तरत।**

मेषाय जिह्वालोलुपतायाः दण्डं कथं दीयते स्म?

**III. निर्देशानुसारम् उत्तरत –**

(i) गद्यांशे 'पाकशाला' इति समानार्थकं किं पदं प्रयुक्तम्?

(अ) भाजनम् (ब) महानसम्

(स) अश्वशाला (द) काष्ठम्

(ii) 'वानरक्रीडारताः' इति पदस्य विशेष्यपदं किम्?

(अ) वानराः (ब) मेषः

(स) पुत्राः (द) भूपतिः

11. **अधोलिखितं श्लोकं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।** (2+1+2)=5

धनस्य निःसारलघोः स सारो यद् दीयते लोकहितोन्मुखेन।
निधानतां याति हि दीयमानम् अदीयमानं निधनैकनिष्ठम्।।

**I. एकपदेन उत्तरत।**

(i) निःसारं लघु च किं वर्तते?

(ii) अदीयमानं धनं कं याति?

**II. पूर्णवाक्येन उत्तरत।**

धनस्य महत्त्वं कदा वर्धते?

**III. निर्देशानुसारम् उचितम् उत्तरं प्रदत्तविकल्पेभ्यः चित्वा लिखत –**

(i) 'तुच्छम्' इति अर्थे किं पदम् प्रयुक्तम्?

(अ) निःसारम् (ब) निधनम्

(स) सारः (द) लघु

(ii) 'यत्' सर्वनामपदं कस्मै प्रयुक्तम्?

(अ) साराय (ब) एकनिष्ठाय

(स) लोकहिताय (द) धनाय

12. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत। **(2+1+2)=5**

अर्जुनः - केन प्रयुक्तः पूरुषः पापं चरति?

कृष्णः - कामेन।

अर्जुनः - कामः कस्मात् उद्भवति?

कृष्णः - रजोगुणात् कामः उद्भवति।

अर्जुनः - कामः कीदृशोऽस्ति?

कृष्णः - कामः महाशनः महापाप्मा च अस्ति।

अर्जुनः - किं क्रोधोऽपि महाशनः महापाप्मा च।

कृष्णः - उचितं पृष्टं भवता। क्रोधोऽपि महाशनः महापाप्मा।

अर्जुनः - एवम्।

कृष्णः - पार्थ! एताभ्याम् एव वैरस्य उत्पत्तिः भवति।

**I. एकपदेन उत्तरत।**

(i) कामः कस्मात् उद्भवति?

(ii) केन प्रयुक्तः पूरुषः पापं चरति?

**II. पूर्णवाक्येन उत्तरत।**

कामस्य स्वरूपं कीदृशम् अत्र?

**III. निर्देशानुसारम् शुद्धम् उत्तरं विकल्पेभ्यः चित्वा लिखत।**

(i) 'चरति' इति क्रियापदस्य कर्तृपदं किम्?

(अ) कामः (ब) क्रोधः

(स) पूरुषः (द) पापम्

(ii) 'इच्छा' इति पदस्य पर्यायपदं किम्?

(अ) महाशनः (ब) महापाप्मा

(स) क्रोधः (द) कामः

(½×8)=4

**13. मञ्जूषातः उचितपदानि चित्वा अधोलिखितपङ्क्त्योः भावार्थं पूरयत।**

**I.** 'सर्वव्यसनविनाशे को दक्षः? सर्वथा त्यागी।'

**भावः**-सर्वथा त्यागी। अर्थात् अस्मिन् संसारे _(i)_ एव सर्वेषां संकटानां विनाशे _(ii)_ भवति _(iii)_ सर्वप्रकारेण _(iv)_ अस्ति। अर्थात् यः आसक्ति रहितः भवति।

**II.** आमरणात् किं शल्यम्? प्रच्छन्नं यत्कृतं पापम्।

**भावः**-किं तत् वस्तु यत् _(i)_ कण्टकम् इव _(ii)_ ददाति? उत्तरम् - गुप्तरूपेण कृतं _(iii)_ एव _(iv)_ पीडयति

**मञ्जूषा**

| |
|---|
| **यः, सः, त्यागी, कुशलः, अजीवनं, मानवं, पीडां, पापकर्म** |

1×4=4

**14. मञ्जूषातः समुचितं पदं चित्वा अधोलिखितश्लोकस्य अन्वयं पूरयत।**

शुक्रोऽहमस्मि देवेन्द्रस्त्वत्समीपमुपागतः।

वरं वृणीष्व राजर्षे। यदिच्छसि तदुच्यताम्।।

**अन्वयः**- _(i)_ अहम् देवेन्द्रः शक्रः _(ii)_ , त्वत्समीपम् _(iii)_ अस्मि। वरम् वृणीष्व यत् _(iv)_ तत् उच्यताम्।

मञ्जूषा

| अस्मि, राजर्षे!, इच्छसि, उपागतः |
|---|

**15. वाक्येषु रेखाकितपदानां स्थाने प्रश्नवाचकपदं प्रयुज्य प्रश्ननिर्माणं कुरुत।** **1×4=4**

(i) एकस्मिन् नगरे <u>चन्द्रो</u> नाम भूपतिः प्रतिवसति स्म।

(ii) <u>राज्ञः पुत्राः</u> वारनक्रीडारताः आसन्।

(iii) तेषां मेषाणां मध्ये एको मेषः <u>जिह्वालोलुपः</u> आसीत्।

(iv) सः <u>महानसं</u> प्रविश्य यद् पश्यति तद् भक्षयति।

**16. अधोलिखितानि वाक्यानि घटनाक्रमानुसारं पुनः लिखत।** **½×8=4**

(i) ज्वलन् सः मेषः अश्वशालां प्रविष्टः।

(ii) अन्यस्मिन् अहनि सः मेषः सूपकारेण अर्धज्वलितकाष्ठेन ताडितः।

(iii) भूपतेः चन्द्रस्य पुत्राः वानरान् भोज्यपदार्थैः पुष्टिं नयन्ति स्म।

(iv) जिह्वायाः स्वादलुब्धाः वानराः राजभवनं त्यक्तुं न स्वीकृतवन्तः।

(v) सूपकारैः नित्यं ताडितं मेषं दृष्ट्वा वानरयूथपतिः वानरान् राजभवनं त्यक्तुम् अकथयत्।

(vi) राजा राजवैद्यम् आहूय अश्वरक्षायै निवेदनम् अकरोत्।

(vii) तेन अश्वाः दग्धाः भूत्वा प्राणरक्षार्थम् इतस्ततः अधावन्।

(viii) राजगृहे बालवाहनयोग्यः मेषः महानसं प्रविश्य प्रतिदिनं भोजनं खादति स्म।

**17. रेखाङ्कितपदानां प्रसङ्गानुसारम् उचितम् अर्थं चित्वा लिखत।** **4**

(i) अमात्याः <u>विषण्णाः</u> अभवन्

(अ) प्राणिनः (ब) दुःखिनः

(स) सुखिनः (द) धनिनः

(ii) भगवान् बोधिसत्त्वः प्रार्थितं वस्तुम् ददाति स्म।

(अ) इच्छितम् (ब) गतम्

(स) हसितम् (द) मतम्

(iii) याचकाः अभीष्टानि वस्तूनि प्राप्य संतोषं भजन्ते।

(अ) दत्तानि (ब) मनोऽभिलषितानि

(स) आगतानि (द) गतानि

(iv) लोके चक्षुर्दानं दुष्करम् एव।

(अ) यशस्करम् (ब) असुलभम्

(स) सुकरम् (द) कठिनम्

❑ ❑ ❑ ❑